শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীভগৱদ্ধ্যানসোপানম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীভগৱদ্ধ্যানসোপানম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

অন্তর্জ্যোতিঃ কিমপি যমিনামঞ্জনং যোগদৃষ্টেঃ
চিন্তারত্নং সুলভমিহ নঃ সিদ্ধিমোক্ষানুরূপম্।
দীনানাথৱ্যসনশমনং দৈৱতং দৈৱতানাং
দিৱ্যং চক্ষুঃ শ্রুতিপরিষদাং দৃশ্যতে রঙ্গমধ্যে॥ ১॥

ৱেলাতীতশ্রুতিপরিমলং ৱেধসাং মৌলিসেৱ্যং
প্রাদুর্ভূতং কনকসরিতঃ সৈকতে হংসজুষ্টে।
লক্ষ্মীভূম্যোঃ করসরসিজৈর্লালিতং রঙ্গভর্তুঃ
পাদাম্ভোজং প্রতিফলতি মে ভাৱনাদীর্ঘিকাযাম্॥ ২॥

চিত্রাকারাং কটকরুচিভিশ্চারুৱৃত্তানুপূর্ৱাং
কালে দৃত্যদ্রুততরগতিং কান্তিলীলাকলাচীম্।
জানুচ্ছাযাদ্বিগুণসুভগাং রঙ্গভর্তুর্মদাত্মা
জঙ্ঘাং দৃষ্টৱা জননপদৱীজাঙ্ঘিকত্বং জহাতি॥ ৩॥

কামারামস্থিরকদলিকাস্তম্ভসম্ভাৱনীযং
ক্ষৌমাশ্লিষ্টং কিমপি কমলাভূমিনীলোপধানম্।
ন্যঞ্চতকাঞ্চীকিরণরুচিরং নির্ৱিশত্যূরুযুগ্মং
লাৱণ্যৌঘদ্ৱযমিৱ মতির্মামিকা রঙ্গযূনঃ॥ ৪॥

সম্প্রীণাতি প্রতিকলমসৌ মানসং মে সুজাতা
গম্ভীরত্বাত্ ক্বচন সমযে গূঢনিক্ষিপ্তৱিশ্বা।
নালীকেন স্ফুরিতরজসা ৱেধসো নির্মিমাণা
রম্যাৱর্তদ্যুতিসহচরী রঙ্গনাথস্য নাভিঃ॥ ৫॥

শ্রীৱতসেন প্রথিতৱিভৱং শ্রীপদন্যাসধন্যং
মধ্যং বাহ্বোর্মণিৱররুচা রঞ্জিতং রঙ্গধাম্নঃ।

www.prapatti.com

সান্দ্রচ্ছাযং তরুণতুলসীচিত্রযা ৱৈজযন্ত্যা
    সন্তাপং মে শমযতি ধিযশ্চন্দ্রিকোদারহারম্॥ ৬ ॥

একং লীলোপহিতমিতরং বাহুমাজানুলম্বং
    প্রাপ্তা রঙ্গে শযিতুরখিলপ্রার্থনাপারিজাতম্।
দৃপ্তা সেযং দৃঢনিযমিতা রশ্মিভির্ভূষণানাং
    চিন্তাহস্তিন্যনুভৱতি মে চিত্রমালানযন্ত্রম্॥ ৭ ॥

সাভিপ্রাযস্মিতৱিকসিতং চারুবিম্বাধরোষ্ঠং
    দুঃখাপাযপ্রণযিনি জনে দূরদত্তাভিমুখ্যম্।
কান্তং ৱক্ত্রং কনকতিলকালঙ্কৃতং রঙ্গভর্তুঃ
    স্বান্তে গাঢং মম ৱিলগতি স্বাগতোদারনেত্রম্॥ ৮ ॥

মাল্যৈরন্তঃ স্থিরপরিমলৈর্ৱল্লভাস্পর্শমান্যৈঃ
    কুপ্যচ্চোলীৱচনকুটিলৈঃ কুন্তলৈঃ শ্লিষ্টমূলে।
রত্নাপীডদ্যুতিশবলিতে রঙ্গভর্তুঃ কিরীটে
    রাজন্বত্যঃ স্থিতিমধিগতা ৱৃত্তযশ্চেতসো মে॥ ৯ ॥

পাদাম্ভোজং স্পৃশতি ভজতে রঙ্গনাথস্য জঙ্ঘাম
    ঊরুদ্বন্দ্বে ৱিলগতি শনৈরূর্ধ্বমভ্যেতি নাভিম্।
ৱক্ষস্যাস্তে ৱলতি ভুজযোর্মামিকেযং মনীষা
    ৱক্ত্রাভিখ্যাং পিবতি ৱহতে ৱাসনাং মৌলিবন্ধে॥ ১০ ॥

কান্তোদারৈরযমিহ ভুজৈঃ কঙ্কণজ্যাকিণাঙ্কৈঃ
    লক্ষ্মীধাম্নঃ পৃথুলপরিঘৈর্লক্ষিতাভীতিহেতিঃ।
অগ্রে কিঞ্চিদ্ভুজগশযনঃ স্বাত্মনৈৱাত্মনঃ সন
    মধ্যেরঙ্গং মম চ হৃদযে ৱর্ততে সাৱরোধঃ॥ ১১ ॥

রঙ্গাস্থানে রসিকমহিতে রঞ্জিতাশেষচিত্তে
    ৱিদ্বৎসেৱাৱিমলমনসা ৱেঙ্কটেশেন ক্লৃপ্তম্।
অক্লেশেন প্রণিহিতধিযামারুরুক্ষোরৱস্থাং
    ভক্তিং গাঢাং দিশতু ভগৱদ্ধ্যানসোপানমেতত্॥ ১২ ॥

॥ ইতি শ্ৰীভগৱদ্ধ্যানসোপানম্ সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্ৰীমতে ৱেঙ্কটেশায ৱেদান্তগুৱৱে নমঃ॥

www.prapatti.com